# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ६१

तच्छ्रुत्वा भाषितं तस्य शत्रुघ्नस्य महात्मनः ।
क्रोधमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥ १॥

पाणौ पाणिं विनिष्पिष्य दन्तान्कटकटाय्य च ।
लवणो रघुशार्दूलमाह्वयामास चासकृत् ॥ २॥

तं ब्रुवाणं तथा वाक्यं लवणं घोरविक्रमम् ।
शत्रुघ्नो देव शत्रुघ्न इदं वचनमब्रवीत् ॥ ३॥

शत्रुघ्नो न तदा जातो यदान्ये निर्जितास्त्वया ।
तदद्य बाणाभिहतो व्रज तं यमसादनम् ॥ ४॥

ऋषयोऽप्यद्य पापात्मन्मया त्वां निहतं रणे ।
पश्यन्तु विप्रा विद्वांसस्त्रिदशा इव रावणम् ॥ ५॥

त्वयि मद्बाणनिर्दग्धे पतितेऽद्य निशाचर ।
पुरं जनपदं चापि क्षेममेतद्भविष्यति ॥ ६॥

अद्य मद्बाहुनिष्क्रान्तः शरो वज्रनिभाननः ।
प्रवेक्ष्यते ते हृदयं पद्ममंशुरिवार्कजः ॥ ७॥

एवमुक्तो महावृक्षं लवणः क्रोधमूर्छितः ।
शत्रुघ्नोरसि चिक्षेप तं शूरः शतधाच्छिनत् ॥ ८॥

तद्दृष्ट्वा विफलं कर्म राक्षसः पुनरेव तु ।
पादपान्सुबहून्गृह्य शत्रुघ्ने व्यसृजद्बली ॥ ९॥

शत्रुघ्नश्चापि तेजस्वी वृक्षानापततो बहून् ।
त्रिभिश्चतुर्भिरेकैकं चिच्छेद नतपर्वभिः ॥ १०॥

ततो बाणमयं वर्षं व्यसृजद्राक्षसोरसि ।
शत्रुघ्नो वीर्यसम्पन्नो विव्यथे न च राक्षसः ॥ ११॥

ततः प्रहस्य लवणो वृक्षमुत्पाट्य लीलया ।
शिरस्यभ्यहनच्छूरं स्रस्ताङ्गः स मुमोह वै ॥ १२॥

तस्मिन्निपतिते वीरे हाहाकारो महानभूत् ।
ऋषीणां देव सङ्घानां गन्धर्वाप्सरसाम् अपि ॥ १३॥

तमवज्ञाय तु हतं शत्रुघ्नं भुवि पातितम् ।
रक्षो लब्धान्तरमपि न विवेश स्वमालयम् ॥ १४॥

नापि शूलं प्रजग्राह तं दृष्ट्वा भुवि पातितम् ।
ततो हत इति ज्ञात्वा तान्भक्षान्समुदावहत् ॥ १५॥

मुहूर्ताल्लब्धसंज्ञस्तु पुनस्तस्थौ धृतायुधः ।
शत्रुघ्नो राक्षसद्वारि ऋषिभिः सम्प्रपूजितः ॥ १६॥

ततो दिव्यममोघं तं जग्राह शरमुत्तमम् ।
ज्वलन्तं तेजसा घोरं पूरयन्तं दिशो दश ॥ १७॥

वज्राननं वज्रवेगं मेरुमन्दर गौरवम् ।
नतं पर्वसु सर्वेषु संयुगेष्वपराजितम् ॥ १८॥

असृक्चन्दनदिग्धाङ्गं चारुपत्रं पतत्रिणम् ।
दानवेन्द्राचलेन्द्राणामसुराणां च दारुणम् ॥ १९॥

तं दीप्तमिव कालाग्निं युगान्ते समुपस्थिते ।
दृष्ट्वा सर्वाणि भूतानि परित्रासमुपागमन् ॥ २०॥

सदेवासुरगन्धर्वं समुनिं साप्सरोगणम् ।
जगद्धि सर्वमस्वस्थं पितामहमुपस्थितम् ॥ २१॥

ऊचुश्च देवदेवेशं वरदं प्रपितामहम् ।
कच्चिल्लोकक्षयो देव प्राप्तो वा युगसङ्क्षयः ॥ २२॥

नेदृशं दृष्टपूर्वं न श्रुतं वा प्रपितामह ।
देवानां भयसंमोहो लोकानां सङ्क्षयः प्रभो ॥ २३॥

तेषां तद्वचनं श्रुत्वा ब्रह्मा लोकपितामनः ।
भयकारणमाचष्टे देवानामभयङ्करः ॥ २४॥

वधाय लवणस्याजौ शरः शत्रुघ्नधारितः ।
तेजसा यस्य सर्वे स्म संमूढाः सुरसत्तमाः ॥ २५॥

एषो हि पूर्वं देवस्य लोककर्तुः सनातनः ।

शरस्तेजोमयो वत्सा येन वै भयमागतम् ॥ २६ ॥

एष वै कैटभस्यार्थे मधुनश्च महाशरः ।
सृष्टो महात्मना तेन वधार्थं दैत्ययोस्तयोः ॥ २७ ॥

एवमेतं प्रजानीध्वं विष्णोस्तेजोमयं शरम् ।
एषा चैव तनुः पूर्वा विष्णोस्तस्य महात्मनः ॥ २८ ॥

इतो गच्छता पश्यध्वं वध्यमानं महात्मना ।
रामानुजेन वीरेण लवणं राक्षसोत्तमम् ॥ २९ ॥

तस्य ते देवदेवस्य निशम्य मधुरां गिरम् ।
आजग्मुर्यत्र युध्येते शत्रुघ्नलवणावुभौ ॥ ३० ॥

तं शरं दिव्यसङ्काशं शत्रुघ्नकरधारितम् ।
ददृशुः सर्वभूतानि युगान्ताग्निमिवोत्थितम् ॥ ३१ ॥

आकाशमावृतं दृष्ट्वा देवैर्हि रघुनन्दनः ।
सिंहनादं मुहुः कृत्वा ददर्श लवणं पुनः ॥ ३२ ॥

आहूतश्च ततस्तेन शत्रुघ्नेन महात्मना ।
लवणः क्रोधसंयुक्तो युद्धाय समुपस्थितः ॥ ३३ ॥

आकर्णात्स विकृष्याथ तद्धनुर्धन्विनां वरः ।
स मुमोच महाबाणं लवणस्य महोरसि ।
उरस्तस्य विदार्याशु प्रविवेश रसातलम् ॥ ३४ ॥

गत्वा रसातलं दिव्यं शरो विबुधपूजितः ।
पुनरेवागमत्तूर्णमिक्ष्वाकुकुलनन्दनम् ॥ ३५ ॥

शत्रुघ्नशरनिर्भिन्नो लवणः स निशाचरः ।
पपात सहसा भूमौ वज्राहत इवाचलः ॥ ३६ ॥

तच्च दिव्यं महच्छूलं हते लवणराक्षसे ।
पश्यतां सर्वभूतानां रुद्रस्य वशमन्वगात् ॥ ३७ ॥

एकेषुपातेन भयं निहत्य
लोकत्रयस्यास्य रघुप्रवीरः ।
विनिर्बभावुद्यतचापबाणस्
तमः प्रणुद्येव सहस्ररश्मिः ॥ ३८ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com